मपरां विधवामपि । मुखदुष्टां योनिदुष्टां व्याधिताञ्चैव कुट्टिनीम् । पतिपुत्त्रविहीनाञ्च डाकिनीं पुंश्चलीमहो । कुम्भकारं तैलकारं व्याधं सर्पोपजीविनम् । कुचेलमतिरुक्षाङ्गं नग्नं काषायवासिनम् । अङ्गविक्रयिणञ्चैव कन्याविक्रयिणं तथा । चितां दग्धशवं भस्म निर्व्वाणाङ्गारमेव च । सर्पक्षतनरं सर्पं गोधाञ्च शशकं विषम् । श्राद्धपात्रञ्च पिण्डञ्च मोटकं वानरं तथा । देवलं वृषवाहञ्च शूद्रश्राद्धान्नभोजिनम् । शूद्रान्नपाचकं शूद्रयाजकं ग्रामयाजकम् । कुशपुत्तलिकाञ्चैव शवदाहनकारिणम् । शून्यकुम्भं भग्नकुम्भं तैलं लवणमस्थि च । कार्पासं कच्छपं चूर्णं कुक्कुरं शब्दकारिणम् । दक्षिणेन शृगालञ्च कुर्वन्तं भैरवं रवम् । कपर्द्दकञ्च चौरञ्च छिन्नकेशं नखं मलम् । कलहञ्च विलापञ्च विलापकारिणं जनम् । अमङ्गलं वदन्तञ्च रुदन्तं शोककारिणम् । मिथ्यासाक्षिप्रदातारं चौरञ्च नरघातिनम् । पुंश्चलीपतिपुत्त्रञ्च पुंश्चल्योदनभोजिनम् । देवतागुरुविप्राणां वस्तुवित्तापहारिणम् । दत्तापहारिणं दस्युं हिंसकं सूचकं खलम् । पितृमातृविरक्तञ्च द्विजाश्वत्थविघातिनम् । सत्यघ्नञ्च कृतघ्नञ्च स्थाप्यापहारिणं जनम् । विप्रद्रोहं मित्रद्रोहं चतं विश्वासघातकम् । गुरुदेवद्विजानाञ्च निन्दकं स्वाङ्गघातकम् । जीवानां घातकञ्चैव स्वाङ्गहीनञ्च निर्द्दयम् । व्रतोपवासहीनञ्च दीक्षाहीनं नपुंसकम् । गलितव्याधिगात्रञ्च काणं बधिरमेव च । पुक्कसं छिन्नलिङ्गञ्च सुरामत्तं सुरां तथा । क्षिप्रं वमन्तं रुधिरं महिषं गर्द्दभं तथा । मूत्रं पुरीषं श्लेष्माणं कन्थिनं न्टकपालिनम् । झञ्झावातं रक्तवृष्टिं वात्याञ्च वृक्षपातनम् । वृकञ्च शूकरं गृध्रं श्येनं कङ्कञ्च भल्लुकम् । पाशञ्च शुष्ककाष्ठञ्च वायसं गन्धकं तथा । अग्रदानिब्राह्मणञ्च तन्त्रमन्त्रोपजीविनम् । वैद्यञ्च रक्तपुष्पञ्चैवौषधं तुषमेव च । कुवार्त्तां मृतवार्त्ताञ्च विप्रशापञ्च दारुणम् । दुर्गन्धवातं दुःशब्दं राजा संप्राप वर्त्मनि । मनश्च कुत्सितं प्राणः क्षुभितश्च निरन्तरम् । वामाङ्गस्पन्दनं देहज्वरो राज्ञो बभूव ह । तथापि राजा निःशङ्कं दर्शंदर्शममङ्गलम्” इति ब्रह्म०पु०नि०नि एवमन्यान्यपि साधारणासाधारणानि निमित्तानान्यूह्येयानि “अमङ्गलाभ्यासरतिं विचिन्त्य तम्” कुमा०

**अमङ्गल्य** त्रि० अमङ्गलाय हितं यत् । अमङ्गलसाधने “अमङ्गल्यं शीलं तव भवतु नामैकमखिलम्” पुष्पदन्तः ।

**अमण्ड** त्रि० नास्ति मण्डो भक्तावशिष्टं भूषा वा यस्य । १ मण्डहीने भक्तादौ २ भूषणहीने च ।

**अमत** पु० अम-रागादौ अतच् । १मृत्यौ २काले ३रोगे च । ४रेणौ उज्ज्वल० । मन—क्त न०त० । ५सम्मतभिन्ने त्रि० । “यस्यामतं तस्य मतमिति श्रुतिः । ६अज्ञाते च ।

**अमति** पु० अम—अति । १ काले उणा० । २ चन्द्रे मेदि० ३रूपे स्त्री निरु० वेदे तु रूपे एव अस्य प्रयोगः “हिरण्ययीममतिं यामशिश्रेत्” “व्युर्वा पृथ्वीममतिं सृजान” ऋ०७,३८,१,२ अमतिं रूपमिति भा० आबन्धुरेष्वमतिं दर्शता” १,६४,६ । दुष्टे त्रि० शब्दार्थ०। मननं मतिः अभावे न०त०। ४ज्ञानाभावे यथास्वरूपाज्ञाने । “अमत्यैतानि षड्जग्ध्वा त्रिरात्रमिति” मनुः “कृच्छ्रांस्तु चतुरः कुर्य्याद्गोबधे बुद्धिपूर्व्वके अमत्या तु द्वयं कुर्य्यादिति स्मृतिः ५ अप्रशस्तबुद्धौ च स्त्री न०ब० । ६ज्ञानहीने त्रि० ।

**अमतीवन्** त्रि० अमतिरप्रशस्ता बुद्धिः तया वनुते वन-क्विप् दीर्घः । अप्रशस्तबुद्धियुक्ते । “न मे स्तोताऽमतीवान दुर्हितः स्यात्” ऋ०८,१९,२६ । “अमतीवा अप्रशस्तबुद्धिमान्” भा० ।

**अमत्र** न० अमत्यन्नमत्र अम—भोजने आधारे अत्रन् । १भोजनपात्रे । “अयं सोमश्चमूसुतोऽमत्रे परिषिच्यते” ऋ०५, “आसनं वसनं चैव शय्याऽमत्रं कमण्डलुः । आत्मनस्तु शुचीनि स्युर्न परेषां कदाचन” स्मृतिः । अम—रोगे अत्रन् । २ शत्रूणामभिभावके । “महाँ अमत्रो वृजने” ऋ०३,३६,४ । “अमत्रः शत्रूणामभिभविता” भा० अम—गतौ कर्त्तरि अत्रन् । ३गमनशीले त्रि० । “स्थिरमत्रो ववक्षे रणाय १,६१,६ । “अमत्रः युद्धादिषु गमनकुशलः” भा० ४ बले च “गम्भीरेण न उरुणाममत्रिन्” ! ६,२४,६ “अमत्रं बलं तद्वन् ! भा० ।

**अमत्त** त्रि० न०त० । १ मत्तभिन्ने मादकद्रव्यादिभिरविकृतचित्ते २सावधाने अप्रमत्ते च । [२अन्यद्वेषशून्ये त्रि०।

**अमत्सर** पु० अभावे न०त० । १अन्यशुभद्वेषाभावे । न०ब० ।

**अमनस्** त्रि० नास्ति कार्य्यक्षमं मनो यस्य । १ कार्य्यक्षममनोहीने बालादौ “यथा बाला अमनसः प्राणन्तः” छा०उ०। २मनोवृत्तिहीने योगिनि च । सर्व्वथा मनःशून्ये ३परात्मनि पु० “अप्राणोह्यमनाः शुभ्रः” श्रुतिः । वा कप् । ४अन्यमनस्के ५स्नेहशून्ये ६अनिगृहीतमनस्के च ६योगग्रन्थभेदे पु० ।

**अमनि** स्त्री अमति गच्छत्यत्र अम-अनि । पथि ।

**अमनुष्य** पु० अप्राशस्त्ये न०त० । १ मनुष्योचितकर्त्तव्यशून्ये जातिमात्रमनुष्ये २मनुष्यभिन्ने गन्धर्व्वादौ च “सहस्रसंवत्सरममनुष्याणामसम्भवात्” कात्या० १,६,१७ । सहस्रसंवत्सर-